श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री अगस्त्यमुनि विरचितम्

# ॥ श्रीलक्ष्मीस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to **Dr. Parthasarathy Desikan** of Bangalore for proofreading this document.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीलक्ष्मीस्तोत्रम् ॥

पद्मे पद्मपलाशाक्षि जय त्वं श्रीपतिप्रिये।
जगन्मातर्महालक्ष्मि संसारार्णवतारिणी॥ १ ॥

महालक्ष्मि नमस्तुभ्यं नमस्तुभ्यं सुरेश्वरि।
हरिप्रिये नमस्तुभ्यं नमस्तुभ्यं दयानिधे॥ २ ॥

पद्मालये नमस्तुभ्यं नमस्तुभ्यं च सर्वदे।
सर्वभूतहितार्थाय वसुवृष्टिं सदा कुरु॥ ३ ॥

जगन्मातर्नमस्तुभ्यं नमस्तुभ्यं दयानिधे।
दयावति नमस्तुभ्यं विश्वेश्वरि नमोऽस्तु ते॥ ४ ॥

नमः क्षीरार्णवसुते नमस्त्रैलोक्यधारिणी।
वसुवृष्टे नमस्तुभ्यं रक्ष मां शरणागतम्॥ ५ ॥

रक्ष त्वं देवदेवेशि देवदेवस्य वल्लभे।
दारिद्र्यान्त्राहि मां लक्ष्मि कृपां कुरु ममोपरि॥ ६ ॥

नमस्त्रैलोक्यजननि नमस्त्रैलोक्यपावनि।
ब्रह्मादयो नमन्ति त्वां जगदानन्ददायिनि॥ ७ ॥

विष्णुप्रिये नमस्तुभ्यं नमस्तुभ्यं जगद्धिते।
आर्तिहन्त्रि नमस्तुभ्यं समृद्धिं कुरु मे सदा॥ ८ ॥

अब्जवासे नमस्तुभ्यं चपलायै नमो नमः।
चञ्चलायै नमस्तुभ्यं ललितायै नमो नमः॥ ९ ॥

नमः प्रद्युम्नजननि मातस्तुभ्यं नमो नमः।
परिपालय भो मातर्मां तुभ्यं शरणागतम्॥ १० ॥

शरण्ये त्वां प्रपन्नोऽस्मि कमले कमलालये।
त्राहि त्राहि महालक्ष्मि परित्राणपरायणे॥ ११ ॥

पाण्डित्यं शोभते नैव न शोभन्ते गुणा नरे।
शीलत्वं नैव शोभेत महालक्ष्मि त्वया विना॥ १२ ॥

तावद्विराजते रूपं तावच्छीलं विराजते।
तावद्गुणा नराणां च यावल्लक्ष्मीः प्रसीदति॥ १३ ॥

लक्ष्मि त्वयाऽलङ्कृतमानवा ये
पापैर्विमुक्ता नृपलोकमान्याः।
गुणैर्विहीना गुणिनो भवन्ति
दुश्शीलिनश्शीलवतां वरिष्ठाः॥ १४ ॥

लक्ष्मीर्भूषयते रूपं लक्ष्मीर्भूषयते कुलम्।
लक्ष्मीर्भूषयते विद्यां सर्वाल्लक्ष्मीर्विशिष्यते॥ १५ ॥

लक्ष्मि त्वद्गुणकीर्तनेन कमलाभूर्यात्यलं जिह्मतां
रुद्राद्या रविचन्द्रदेवपतयो वक्तुं च नैव क्षमाः।
अस्माभिस्तव रूपलक्षणगुणान् वक्तुं कथं शक्यते
मातर्मां परिपाहि विश्वजननि कृत्वा ममेष्टं ध्रुवम्॥ १६ ॥

दीनार्तिभीतं भवतापपीडितं
धनैर्विहीनं तव पार्श्वमागतम्।
कृपानिधित्वान्मम लक्ष्मि सत्वरं
धनप्रदानाद्धननायकं कुरु॥ १७ ॥

मां विलोक्य जननी हरिप्रिये
निर्धनं तव समीपमागतम्।
देहि मे झटिति लक्ष्मि कराग्रं
वस्त्रकाञ्चनवरान्नमद्भुतम्॥ १८ ॥

त्वमेव जननी लक्ष्मि पिता लक्ष्मि त्वमेव च।
भ्राता त्वं च सखा लक्ष्मि विद्या लक्ष्मीस्त्वमेव च॥ १९ ॥

त्राहि त्राहि महालक्ष्मि त्राहि त्राहि सुरेश्वरि।
त्राहि त्राहि जगन्मातः दारिद्र्यात् त्राहि वेगतः॥ २० ॥

नमस्तुभ्यं जगद्धात्रि नमस्तुभ्यं नमोनमः।
धर्माधारे नमस्तुभ्यं नमस्संपत्तिदायिनी॥ २१ ॥

दारिद्र्यार्णवमग्नोऽहं निमग्नोऽहं रसातले।
मज्जन्तं मां करे धृत्वा सूद्धर त्वं रमे द्रुतम्॥ २२ ॥

किं लक्ष्मि बहुनोक्तेन जल्पितेन पुनः पुनः।
अन्यन्मे शरणं नास्ति सत्यं सत्यं हरिप्रिये॥ २३ ॥

एतच्छ्रुत्वाऽगस्त्यवाक्यं हृष्यमाणा हरिप्रिया।
उवाच मधुरां वाणीं तुष्टाऽहं तव सर्वदा॥ २४ ॥

श्रीलक्ष्म्युवाच
यत्त्वयोक्तमिदं स्तोत्रं यः पठिष्यति मानवः।
शृणोति च महाभागस्तस्याहं वशवर्तिनी॥ २५ ॥

नित्यं पठति यो भक्त्या त्वलक्ष्मीस्तस्य नश्यति।
ऋणं च नश्यते तीव्रं वियोगं नैव पश्यति॥ २६ ॥

यः पठेत् प्रातरुत्थाय श्रद्धाभक्तिसमन्वितः।
गृहे तस्य सदा स्थास्ये नित्यं श्रीपतिना सह॥ २७ ॥

सुखसौभाग्यसंपन्नो मनस्वी बुद्धिमान्भवेत्।
पुत्रवान् गुणवान् श्रेष्ठो भोगभोक्ता च मानवः॥ २८ ॥

इदं स्तोत्रं महापुण्यं लक्ष्म्याश्चागस्त्यकीर्तितम्।
विष्णुप्रसादजननं चतुर्वर्गफलप्रदम्॥ २९ ॥

राजद्वारे जयश्चैव शत्रोश्चैव पराजयः।
भूतप्रेतपिशाचानां व्याघ्राणां न भयं तथा॥ ३० ॥

न शस्त्रानलतोयौघाद्भयं तस्य प्रजायते।
दुर्वृत्तानां च पापानां बहुहानिकरं परम्॥ ३१ ॥

मन्दुराकरिशालासु गवां गोष्ठे समाहितः।
पठेत्तद्दोषशान्त्यर्थं महापातकनाशनम्॥ ३२ ॥

सर्वसौख्यकरं नृणामायुरारोग्यदं तथा।
अगस्त्यमुनिना प्रोक्तं प्रजानां हितकाम्यया॥ ३३ ॥

॥ इति लक्ष्मीस्तोत्रं सम्पूर्णम् ॥